# ''विश्वनाथकविराजकृतं मम्मटकाव्यलक्षणखण्डनं स्वमतस्थापनम् च''

**पूनम कुमारी**
शोधार्थिनी
साहित्यविभागः
श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालयः
नव देहली–110016

## सारांशिका

काव्यं जनचेतनायाः सृष्टिररस्ति। काव्यस्य लक्षणनिर्धारणमेव काव्यशास्त्रस्य प्रयोजनम्। लक्षणस्यार्थः अस्ति–''असाधारणः धर्मः''।

भारतीय काव्य शास्त्रे परिभाषा एवं लक्षणरूपेण उपस्थापिता। सर्वप्रथमं काव्यं किम्? कवेः भावो काव्यमुच्यते।

आचार्यमम्मटस्य काव्यलक्षणम्–''**तददोषौ शब्दार्थौ सगुणावनंलकृतो पुनः क्वापि**''।।1

आर्चार्यविश्वनाथेन 'अदोषौ सगुणौ' एतयोः द्वयोः आलोचना कृता। आचार्यविश्वनाथः कथ्यते–

यत् यदि दोषरहितौ शब्दार्थौ काव्यं तदा दोषरहितं काव्यम् अस्मिन् संसारे अतिदुर्लभं भविष्यति।

**विश्वनाथमतेन**–केवलं रमणीयशब्दानां संयोगेन काव्यं न भवति। काव्यं तु यदा भवति तदा शब्दार्थाः वाक्यरूपेण आगताः। न केवलं वाक्यरूपेण अपितु रसात्मकवाक्यरूपेण तेषां प्रस्तुतिः भवेत्। रसात्मकताया अवान्तरत्वं चारुत्वं, दोषरहितत्वं, गुणानां समावेशः, समुचितम् अलंकारविधानमपि आयाति। अतएव विश्वनाथस्य सूत्रम्–

''**वाक्यं रसात्मकं काव्यम्**''2 अद्यापि साहित्यस्य मूलं मन्यते।

**बीजबिन्दव** : कविराज विश्वनाथः, मम्मटः, काव्यलक्षणम्, खण्डनम्, स्वमतस्थापनम्।

**प्रस्तावना**

सर्वप्रथमं वेदः एव वैदिककाव्यरूपेण मन्यते। तदनन्तरं लौकिककाव्यम् अस्तित्वे आयाति। आदिकविवाल्मीकिप्रणीतं रामायणमेव आदिकाव्यरूपेण मन्यते।

''**अर्थक्रियोपेतम् काव्यम्**'' काव्यलक्षणविषये विविधैः आचार्यैः अनेकानि लक्षणानि प्रस्तुतानि सन्ति।

ध्वन्यालोचनकारः कथयति–'कवनीयं काव्यम्'। विद्याधरः वदति–''**कवयति कविः तस्य कर्म काव्यम्।**''

**मम्मटाचार्येण कथ्यते–**

''**लोकोत्तरवर्णननिपुणकविकर्मकाव्यम्।**'' काव्येन आनन्दानुभूतिः जायते। कविः काव्यमाध्यमेन उपदिशति संसारे ज्ञानस्य प्रचार–प्रसारं करोति। कविः स्वकीयान्तर्दृष्ट्या जगतः अवलोकनं करोति तस्य रमणीयस्वरूपं जगतः पुरतो निदधाति। काव्ये ज्ञानतत्त्वानि संगृहीतानि भवन्ति ये मानवानां पदे–पदे उपकारं कुर्वन्ति।

**2. आचार्याणाम् काव्यलक्षणानि–**

काव्यस्य लक्षणविषये विविधाः आचार्याः स्वमतानि दत्तवन्तः। यथा–भामहेनोक्तं–

''**शब्दार्थौ सहितौ काव्यम्।**'' अर्थात् शब्दस्यार्थस्य च सहभावं काव्यं मनुते। आचार्य दण्डिनां उक्तम्–

''**शरीरं तावदिष्टार्थव्यवच्छिना पदावली।**'' अर्थात् यः अभीष्टार्थं व्यनक्ति सः शब्दसमूह एव काव्यम्। दण्डिनः परिभाषा भामहात् भिन्ना। आचार्यः दण्डीः शब्दार्थं काव्यं न मनुते। अपितु इष्टार्थस्य व्यञ्जकपदानामेव काव्यत्वं मनुते। दण्डिनः एका विशेषता इयमस्ति यत् तेन पदावलीं काव्यशरीरं कथयित्वा काव्यात्मनः अन्वेषणस्य मार्गं उद्घाटितः।

**आचार्यवामनानुसारेण–**

''**काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोः वर्तते।**'' अर्थात् यदा शब्दार्थौ गुणालंकाराभ्यां सम्पन्नः दोषरहितौ भवतः तदा एव काव्यं वर्तते। वक्रोक्तिसिद्धान्तस्य प्रतिष्ठापकः आचार्यकुन्तकः काव्यलक्षणं इदृशमस्ति–

''**शब्दार्थौ सहितौ वक्र–कविव्यापारशालिनी। बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।**'' अर्थात् शब्दार्थौ मिलित्वा एव काव्यम् तेषां मतमस्ति यथा तिलेषु तैलम् तथा शब्दार्थयोः आह्लादकारिता शक्तिः निहिता अस्ति। आचार्यमम्टस्य काव्यलक्षणम्–

मम्मटस्य ''काव्यप्रकाशः उत्तरसंस्कृतकालस्य एका प्रौढा रचना मन्यते।

**मम्मटस्य काव्यलक्षणमस्ति–**

''**तद्दोषौ शब्दार्थौ सगुणावनंलकृती पुनः क्वापि।**'' मम्मटस्य मतानुसारं शब्दः अर्थश्चेति द्वयोः समाष्टिरेव काव्यम्।'' शब्दार्थयोः तिस्रः विशेषता अनिवार्याः।

**प्रथमत** : इदं दोषात् मुक्तं भवेत्। यदि सदोषं स्यात् तदा काव्यत्वस्य हानिः।

**द्वितीयत** : माधुर्य, ओजः, प्रसादः इत्यादीनां गुणानां सन्निर्वेशोऽपि भवितव्यः। आचार्यः–मम्मटदृष्ट्या गुणाः रसानां धर्माः।

**तृतीयत** : साधारणतः काव्यम् अलंकृतमेव स्यात् परं यत्र रसादि प्रतीतिः भवति तत्र अलंकाररहितम् अपि काव्यं भवति। आचार्यः मम्मटः अलंकाराणां स्थितिं वैकल्पिकीं मन्यते। आचार्यमम्मटस्य काव्यलक्षणम् ईदृशमपि लोकप्रियं जातम् यतोहि आचार्यः हेमचन्द्रः, वाग्भटः, विद्याधरः, विद्यानाथः, जयदेवः इत्याद्याचार्याणाम् अपि तस्य काव्यलक्षणस्य अनुकरणम् अकुर्वन्।

**आचार्यविश्वनाथेन आचार्यमम्मट काव्यलक्षणस्य खण्डनम्—**

यत्र मम्मटकाव्यलक्षणस्य मण्डनम् अभूत् तत्र तस्य लक्षणस्य खण्डनमपि अभवत्। आचार्यविश्वनाथेन ''अदोषौ'' 'सगुणौ' एतयोः द्वयोः आलोचना कृता। आचार्यविश्वनाथः मम्मटस्य खण्डनं कृत्वा कथयति यत् यदि दोषरहितं शब्दार्थयुगलं काव्यं मनुते तदा दोषरहितं काव्यं अस्मिन् संसारे अति दुर्लभं भविष्यति। यदि दोषरहितं काव्यं दृष्टिगोचरं भवति तदा तद् विरतमेव स्यात्। ''सगुणौ'' विशेषणस्य खण्डनं कर्तु कथयति यत् गुणा रसस्य धर्माः न शब्दार्थाः अतः गुणानां स्थितिः रसे एव भवति न शब्दार्थयोः। पण्डितराजजगन्नाथेनापि ''शब्दार्थौ'' विशेष्यस्य आलोचना कृता। जगन्नाथस्य मतानुसारं काव्यत्वं शब्दः अर्थश्च इति द्वयोः विद्यमानः धर्मः न अस्ति अपितु केवलं शब्देषु निहितः धर्मः अस्ति। यदि वयं द्वयोः निहितः धर्मः इति मन्यामहे तदा द्वयोः स्थितिकारणात् एतत् श्लोकवाक्यमेव अस्ति न तु काव्यम्। अतः काव्यत्वं शब्दार्थयोः न भवति अपितु केवलं शब्देषु एव भवति। पण्डितजगन्नाथस्य आलोचना अतीव गम्भीरा सहानुभूतिपूर्णा च प्रतिभाति।

आचार्यजयदेवेन ''अनलंकृती पुनः क्वापि'' इत्यस्य आलोचनायां लिख्यते—

ये काव्यं अलंकारविहीनं मन्यन्ते ते अग्निं उष्णताविहीनं किमर्थं न मन्यन्ते। यथा—

**''अङ्गीकरोति य काव्यं शब्दार्थानलंकृती।**

**असौ न मन्यते कस्मादनुष्णमनलं कृती।।''9**

जयदेवः अलंकारवादी आचार्यः तस्य अलंकारान् प्रति विशिष्टा आसक्तिः अस्ति। यद्यपि

मम्मटस्य लक्षणस्य आलोचना अभूद् परं तस्य काव्यलक्षणम् अतिपरिमार्जितम्

तेन निर्दोषतां गुणवत्तां च स्वीकृत्य नूतनदृष्टिकोणस्य स्थापना कृता।

**आचार्यविश्वनाथेन स्वकीयमतस्य स्थापनम्—**

आचार्यः विश्वनाथः रसवादी खलु। विश्वनाथेन आचार्यमम्मटस्य लक्षणस्य खण्डनं कृत्वा स्वकीयं पूर्णं निर्दोषं काव्यलक्षणं स्थापितम्। काव्यलक्षणस्य आधार एव रस इति विश्वनाथः। आचार्यः विश्वनाथः रसं काव्यतत्त्वरूपेण स्वीकृत्य स्वकीयं मतं प्रस्तौति। लक्षयति च—

''वाक्यं रसात्मकं काव्यम्'' अर्थात् रसयुक्तं वाक्यमेव काव्यमस्ति। आचार्यविश्वनाथः एकतः रसात्मकं वाक्यं काव्यं मत्वा रसपरम्पराया गतिं वर्धयति अपरतः शब्दार्थाभ्यां पृथग् भूत्वा वाक्यम् एव काव्यं मनुते। अत्र जिज्ञासा भवति वाक्यं किम्? वाक्यं स्याद् योग्यता कांक्षासत्तियुक्तः पदोच्चयः।''10

**योग्यता—**

पदार्थानां परस्परसम्बन्धे बाधाभावः। एकपदार्थस्य अपरपदार्थेन सह बाधाऽभावः एव योग्यता। यथा—''गामानय'' इत्यत्र गोपदार्थस्य आनयपदार्थेन सह यः सम्बन्धः सः बाधितो न वर्तते इति योग्यतायाः सत्वाद् वाक्यत्वं भवति।

**आकाङ्क्षा—**

एकपदार्थस्य अपरपदार्थेन सहान्वयापेक्षा आकाङ्क्षा। सा च श्रोतुः जिज्ञासारूपा यथा देवदत्तोग्रामम्'' इत्यत्र गच्छतीति पदस्य। निराकाङ्क्षस्य वाक्यत्वे गौः, अश्वः, पुरुषो, हस्ती इति। परस्परं निरपेक्षस्य पदसमूहस्यापि वाक्यत्वं स्यात्। अत्र गवाद्यर्थबोधक सुबन्तपदश्रवणानन्तरम् अश्वादिपदान्तरश्रवणेच्छाविरहस्य सिद्धत्वादा काङ्क्षाशून्यत्वम्। अतो नेदं वाक्यम्।

**आसत्तिः—**

यस्य पदार्थस्य येनपदार्थेन सह सम्बन्धापेक्षा तेन सह तस्य अव्यवधानेन स्थितिः आसत्तिः। व्यवधानं द्विविधम्। एकं कालव्यवधानम्। अपरं चानुपयुक्त पदार्थानां सत्त्वम्। कालव्यवधानम् यथा—वाक्ये इदानीमुच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चरितेन गच्छतीति पदेन सङ्गतिः स्यात्। किन्तु ईदृशेन पदसमूहेन न भवति बोधः आसत्तिविरहात् न चेदं वाक्यम्।

**द्वितीयं तु—**

''गिरिर्भुक्तमग्निमान् देवदत्तेन'' अत्र गिरिरग्निमान् 'देवदत्तेन भुक्तम्' इति सम्बन्धः उचितः।

ननु रसात्मकवाक्यं काव्यत्वमुक्तम्। को नाम रसः?

रसपरम्परायां सर्वप्रथमम् आचार्यः भरतः अस्ति। भरतेन नाट्यशास्त्रे षष्ठे अध्याये रससूत्रं प्रदत्तम्।

विभावानुभाव व्यभिचारि संयोगाद् रसनिष्पत्तिः। अस्मिन् सूत्रे संयोगः निष्पतिश्च द्वौ शब्दौ महत्त्वपूर्णौ स्तः। भरतात् परं भट्टलोल्लटस्य उत्पत्तिवादेः, श्रीशङ्कुकाचार्यस्य अनुमितिवादः, भट्टनायकस्य मुक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादः चेति चत्वारः प्रमुखाः व्याख्याकाराः गण्यन्ते। रसशब्दस्य व्युत्पत्ति रूपद्वयेन भवति।

१. रस्यते आस्वाद्यते इति रसः।

२. सरते इति रसः— अर्थात् यस्य प्रवहमाना स्थितिः सः रसः।

काव्यप्रकाशकारेण स्वकीयरसप्रकरणे विस्तारेण इदं मतम् प्रस्तुतम्—

**कारणान्यथ कार्याणि सहकारिणी यानि च,**

**रत्यादेः स्थायिनो लोके तानि चेन्नाट्य काव्ययोः।**

**विभावानुभावास्तत् कथ्यन्ते व्यभिचारिणः,**

**व्यक्तः स तै विभावाद्यैः स्थायी भावो रसः स्मृतः।।''11**

अर्थात् लोके रत्यादेः स्थायिभावस्य यानि कारणानि कार्याणि सहकारिणि भवन्ति तानि यदि नाटकेषु अथवा काव्येषु प्रयुज्यन्ते तर्हि क्रमशः विभावाः, अनुभावाः तथा सञ्चारिभावाः कथ्यन्ते तथास्तैः विभावाद्यैः व्यक्तः स्थायिभावः रसः अभिधीयते। साहित्यदर्पणकारेण विश्वनाथेन रसस्वरूपनिरूपणे कथ्यते—''रस एव अखण्डः स्वप्रकाशानन्दचिन्मयः ब्रह्मास्वादसहोदरः भवति।''

अन्तः करणे रजोगुणं तमोगुणं च निरस्य सत्वगुणस्य निर्मलप्रकाशेन रसस्य साक्षात्कारः भवति। रसास्वादने विषयान्तर ज्ञानं न अनुभूयते। अतः अयं ब्रह्मानन्दसम्मानः प्रतीयते।

आचार्यविश्वनाथेन उच्यते–

**''विभावेनानुभावेन व्यक्तः संचारिणा तथा।**

**रसतामेतिरत्यादिः स्थायीभावः संचेतसाम्।।''12**

भरतमुनिना अन्यभावानाम् अपेक्षया स्थायीभावस्य श्रेष्ठता प्रतिपादिता। यथा–सामान्यनरेषु नरेन्द्रः श्रेष्ठः अथवा शिष्येषु गुरुः तथैव स्थायीभावः अन्येषु भावेषु श्रेष्ठः। आचार्यविश्वनाथः स्थायीभावस्य लक्षणं प्रस्तौति–

**''रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा,**

**जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च।।''13**

दशरूपककारधनञ्जयस्य मतानुसारं स्थायिभावाः अष्टौ। भावस्य पुष्टिः रूपकेषु न भवति तस्य स्थायिभावस्य लक्षणम् ईदृशमस्ति।

**''रत्युत्साहजुगुप्साः क्रोधोहासः स्मयो भयं शोकः।**

**शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैत्तस्य।।''14**

**रसभेदाः–**

**''श्रृंगार–हास्य–करुण–रौद्र–वीर–भयानकाः,**

**बीभत्सोऽद्भुत् इत्यष्टौ रसाः शान्तस्तथा मतः।।''15**

केचिद् आचार्याः शान्तं रसं न स्वीकुर्वन्ति। पण्डितराजजगन्नाथः अस्य समाधानं कुर्वन् कथयति यन्नाटके शान्तरसस्य निषेधो मन्यते परन्तु वयं तु नटे रसस्य स्थितिं नैव स्वीकुर्मः पुनः तस्य शान्त्या किं प्रयोजनम्?

**''शान्तस्य शमासाध्यत्वानटे च तदं सम्भवात्।**

**अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते।।**

**नटेशमाभावादिति हेतुरसङ्गतः,**

**नटे रसाभिव्यक्तेरस्वीकारात्।।''**

अतः रसा नवैव भवन्ति एवञ्च तेषां नवस्थायिभावाः भवन्ति।

**5. निष्कर्ष :**

**''वाक्यं रसात्मकं काव्यम्''**17 अत्र सर्वप्रथमं विश्वनाथेनैव शब्दार्थयोः काव्यं न मत्वा वाक्ये रसात्मकताया स्थितिः एव काव्ये स्वीकृता।

भौतिकदृष्ट्या रसः जिह्वेन्द्रियेण गृह्यते यथा–मधुरः, कटुः, कषायः इत्यादि। परं कविजगति रसस्य स्वरूपं भिन्नम् अत्र रसः अनिर्वचनीयः, हृदयेन ग्राह्यः, आनन्दस्य प्रतीतिरस्ति। रसतत्त्वविश्लेषणात् पूर्वं वयम् जानीमः यत् कालिदासस्य भवभूतेः नाटकेषु य रसस्यानुभूतिः जायते सा रसानुभूतिः भासस्य नाटकेषु न प्रतीयते। कारणं स्पष्टमस्ति यत् भरतमुनेः परवर्ती कालिदासः, भवभूतिश्च इत्यादिनाट्यकाराणां रसप्रक्रिया प्राप्ता परं पूर्ववर्तिभासादीनां रसप्रक्रियाविषये न ज्ञाता। तस्मिन् समये रतिहासादिभावाः स्वकीयमौलिकरूपे अवस्थिताः। ते प्रदीप्तिमात्र भूत्वा अस्माकं चिन्तनस्य विषया एव आसन् चर्वणायाः विषया न आसन्। आचार्यविश्वनाथः कथयति– यत् केवलं रमणीयशब्दानां संयोगेन काव्यं न भवति। काव्यं तु यदा भवति तदा शब्दार्थाः वाक्यरूपेण आगताः। न केवलं वाक्यरूपेण अपितु रसात्मकवाक्यरूपेण तेषां प्रस्तुतिः भवेत्। रसात्मकताया अवान्तरत्वे चारुत्वं, दोषरहित्यं, गुणानां समावेशः समुचितम् अलंकारविधानमपि आयाति। अतएव विश्वनाथस्य सूत्रम्–**''वाक्यं रसात्मकं काव्यम्''** अद्यापि साहित्यस्य मूलं मन्यते।

इति

**सन्दर्भा :**

1. काव्यप्रकाशः 1.4
2. साहित्यदर्पणम् 1.3
3. काव्यालङ्कारः 1.16
4. काव्यादर्शः 1.10
5. वामन 1.1
6. वक्रोक्तिकाव्यजीवनम् 1.7
7. काव्यप्रकाशः 1.4
8. चन्द्रालोक 1.12
9. साहित्यदर्पणम् परिच्छेदः, पृ.सं. 24
10. काव्यप्रकाशः 4.27.28
11. साहित्यदर्पणम्–तृतीयपरिच्छेदः 1
12. साहित्यदर्पणम्– तृतीयपरिच्छेदः 175
13. दशरूपकं 4.35
14. साहित्यदर्पणम् तृतीयपरिच्छेदः 172
15. रसगङ्गाधरः
16. साहित्यदर्पणम् 1.3

**सन्दर्भ सूची :**


1. **साहित्यदर्पणम्** : शालिग्रामशास्त्र प्रकाशनं–मोतिलाल बनारसीदास बंगलो रोड़, दिल्ली
2. **काव्यशास्त्र और साहित्यलोचन** : महर्षिदयानन्द विश्वविद्यालय, Developed by & excel books Pvt. Ltd. |–45, Naraina Phase & 1] New Delhi-1.
3. **काव्यप्रकाश** : श्रीनिवास शर्मा, भारतीय विद्या प्रकाशन, 1 यू.बी. जवाहरनगर बंगलो रोड, दिल्ली–110007।